# संस्कृत-वार्ता:

**दिनाङ्क :-05.08.2024**
**प्रात: - 06:55**

**अथ वार्ता:**

**राष्ट्रपतिः द्रौपदी मुर्मु:**

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: त्रयाणां राष्ट्राणां फिजी-न्यूजीलैण्ड- तिमोरलेस्ते-देशानां यात्रायाः प्रथमे चरणे ह्य: फिजीदेशस्य नादीनगरं प्राप्तवती। स्वीययात्रावधौ राष्ट्रपतिः द्विपक्षीयोपवेशनं करिष्यति, भारतीयप्रवासीभिः च सह संवादं विधास्यति । सप्ताहपर्यन्तम् निजयात्रावधौ राष्ट्रपतिः द्रौपदीमुर्मु: एतैः त्रिभिः देशैः सह भारतस्य सम्बन्धान् सुदृढं कर्तुं विस्तारयितुं च एकं द्विपक्षीयसम्मेलनं करिष्यति। एतेषु त्रिषु देशेषु भारतीयप्रवासिभि: सह सम्बन्धः सम्पर्कं च अस्या: यात्रायाः प्रमुखाः प्रसङ्गाः भविष्यन्ति । अस्या: यात्रायाः उद्देश्यं एतैः राष्ट्रैः सह ऐतिह्यबन्धनस्य सुदृढीकरणं, एक्ट-ईस्ट्-नीतिं प्रति भारतस्य प्रतिबद्धताया: पुनः प्रबलीकरणं च अस्ति।

**चण्डीगढ-अमितशाह:**

केन्द्रीयगृहमंत्री अमितशाह: ह्य: चण्डीगढनगरे आपराधिकन्यायप्रणालीं प्रबलीकर्तुं ई-साक्ष्य-न्यायसेतु-न्यायश्रुति इत्यादिनाम् उद्घाटनं विहितवान्। अत्रावसरे असौ प्रतिपादितवान् यत् राष्ट्रस्य आपराधिकन्यायप्रणाली अधुना नागरिकेभ्य: त्वरितन्याय प्रदानाय कार्यं समाचरिष्यति। असौ अग्रे प्रख्यापितवान् यत् नवीनापराधिकविधिभि: राष्ट्रे आङ्ग्ल-विधीनां युगस्य समाप्तिः कृता। येन हि आपराधिकन्यायप्रणाली पूर्णतया स्वदैशिकी जाता।

**विदेशमन्त्रालय:-बांग्लादेश:**

विदेशमन्त्रालयेन सबलतया परामर्श: प्रख्यापित: यत् भारतीयनागरिका: प्रतिवेशिदेशे बांग्लादेशे घटनाक्रमं निधाय आग◌ामिसूचनाया: प्रागेव यात्रारता: मा भवेयु:। स्वीये परामर्शे मन्त्रालयेन वर्तमाने बाङ्ग्लादेशे सर्वे भारतीय-नागरिका: आहूता: यत्ते अवधानतया तत्र निवसेयु:। अपि च आपत्कालिक-दूरभाष संख्यया ढाकायां भारतीयोच्चायोगेन सह सम्पर्कं साधयन्तु।

**मध्यप्रदेशस्य सागरमण्डलस्य**

ह्य: मध्यप्रदेशस्य सागरमण्डलस्य एकस्मिन् मन्दिरे भित्तिसंनिपातेन नव बाला: मृताः, अनेके च व्रणिताः अभवन् । इयं हृदयविदारकी दुर्घटना शाहपुर-नगरस्य हरदौल्-बाबा-मन्दिरे धार्मिक-समारोहस्य समये घटिता । सागरस्य जनपदाधिकारी दीपक- आर्यः सूचितवान् यत् व्रणिताः बालकाः चिकित्सालये चिकित्सां प्राप्नवन्ति इति। मुख्यमन्त्री मोहनयादवः निर्दोषबालानां मृतानां परिवाराणां कृते गभीरं शोकं प्रकटितवान्। असौ मृतानां बालकानां परिवाराणां कृते चतुर्लक्षरूप्यकाणाम् अनुग्रहराशेः घोषणाम् अकरोत्।

**रक्षाप्रमुख:-सम्मेलनम्**

रक्षाप्रमुखः जनरल-अनिलचौहानः अद्य नवदिल्ल्यां शीर्षस्तरीयस्य त्रिसेवावित्तीयसम्मेलनस्य अध्यक्षतां करिष्यति। सम्मेलनस्य उद्देश्यं सशस्त्रसेनानां वित्तीयविषयेषु समन्वयं वर्धनं च वर्तेते। सम्मेलने रक्षामन्त्रालयस्य वरिष्ठाधिकारिणः, महानियन्त्रकाः भागं ग्रहीष्यन्ति। सम्मेलनस्य समायोजनं एकीकृतरक्षाकर्मचारिणां मुख्यालयेन क्रियते।

**क्रिकेट**

पुरूषाणां क्रिकेट् प्रतिस्पर्धायां, ह्यः रात्रौ कोलम्बोनगरस्य आर्. प्रेमदासा क्रीडाङ्गणे श्रीलङ्कादलेन भारतीयदलं द्वात्रिंशत् धावनाङ्कैः पराजितम्। पणकं विजित्य श्रीलङ्कादलेन वल्लनक्रीडनं चितं, तदनु नवक्रीडकानां हानिपुरस्सरं चत्वारिंशदधिकद्विशतं धावनाङ्कानां लक्ष्यं भारतीयदलाय स्थापितम्। लक्ष्यम् अनुसरता भारतीयदलेन अष्टाधिकद्विशतमेव धावनाङ्काः निर्मिताः।

**पेरिस-ओलम्पिक-क्रीडाकुम्भे**

पेरिस-ओलम्पिक-क्रीडाकुम्भे भारतीयहॉकीदलेन पेनल्टीशूटआउट इत्यस्याः पद्धत्याः अन्तर्गतं ब्रिटेनदलं चत्वारि द्वे इत्यङ्कान्तरालेन पराजित्य उपान्त्यचक्रं सम्प्राप्तम्।

**॥इति वार्ता:॥**